# Shri Rama Saptarshi Stotram

# શ્રીરામસપ્તર્ષિસ્તોત્રમ્

## Document Information

Text title : Shri Rama Saptarshi Stotram

File name : rAmasaptarShistotram.itx

Category : raama

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 13, 2020

*sanskritdocuments.org*

# શ્રીરામસપ્તર્ષિસ્તોત્રમ્

કાશ્યપઃ –

નિત્યં કિં ધાવસિ ચલવિષયાનનુભવિતું સુખલેશાભાસાનુરુતરદુઃખાનતિ- દુઃસહાનત્યન્તાયાસાનંહોમૂલાનુગ્રભયઙ્કરરૌરવાદિનાર
પરિહર સીતાપતિમાશુ પરિચરેશં ભો ચેતઃ શ્રીરામં ભજ શરણમ્ ॥

શ્રિતચિન્તામણિમતિકરુણાકરમરિહરમુરુતરશરકોદણ્ડં ભો ચેતઃ શ્રીરામં ભજ શરણમ્ ॥ ૧॥

અત્રિઃ –

બહુવિધપાપવશાદિહ નાનાયોનિષુ જન્મમૃતિર્યો દેહી દૈવાદુત્તમમાનુષપૂરુષ વિપ્રદેહવિદ્યાસમ્પન્નોઽપિ બ્રહ્મણિ પરમે
વિમુખો દુઃખી દુર્વિષયૈષી નશ્યતિ તૃણકબલસ્વીકરણે કાલે પશુરિવ રોમન્થં કુર્વન્ ભો ચેતઃ શ્રીરામં ભજ શરણમ્ ।
શ્રિતચિન્તામણિમતિકરુણાકરમરિહરમુરુતરશરકોદણ્ડં ભો ચેતઃ શ્રીરામં ભજ શરણમ્ ॥ ૨॥

ભરદ્વાજઃ–

ઉપર્યુપરિ મનોરથજાલં વિદ્વાનપિ કામયતે યતતે પુત્રમિત્રકલત્રાદિષુ નિર્વેદં નૈતિ કામકામી વિદ્યાસમ્પત્કુલધનસૌભગયૌવનગર્વપર્વ
મૂઢઃ પશ્ચાદન્ધે તમસિ પતેદવશોઽન્યોઽન્ધુમિવ ભો ચેતઃ શ્રીરામં ભજ શરણં ભજ રઘુરામં શરણમ્ ॥

શ્રિતચિન્તામણિમતિકરુણાકરમરિહરમુરુતરશરકોદણ્ડં ભો ચેતઃ શ્રીરામં ભજ શરણમ્ ॥ ૩॥

વિશ્વામિત્રઃ –

અરિષડ્વર્ગં જહિ તૃષ્ણામપિ માયાવિલસિતમિદમિતિ બુદ્ધ્વા દુર્જનસઙ્ગતિમતિદૂરીકુરુ સજ્જનમાશ્રય ભો પરધનપરદારાભિરતિં ત્યજ પારલૌકિકં ધર્મં પરિચિનુ પદ્માપતિપદપદ્મં સેવ(ય)(સ્વ) બન્ધવિમુક્ત્યૈ ભો ચેતઃ શ્રીરામં ભજ શરણમ્ ॥

શ્રિતચિન્તામણિમતિકરુણાકરમરિહરમુરુતરશરકોદણ્ડં ભો ચેતઃ શ્રીરામં ભજ શરણમ્ ॥ ૪॥

ગૌતમઃ –

કર્ણાકર્ણય વૈદેહીવરવર્ણનીયગુણવન્દિતચરિતં નયનાલોકય નયનનલિનમુખસુન્દરેન્દુબિમ્બં મસ્તક સંસ્તુતમહિમાનં નમ કસ્તૂરીનિકરાકારં હસ્તયુગાર્ચય હરિપદમમલં હ્યવનીપાલમિનકુલરત્નં ભો ચેતઃ શ્રીરામં ભજ શરણં ભજ રઘુરામં શરણમ્ ॥

શ્રિતચિન્તામણિમતિકરુણાકરમરિહરમુરુતરશરકોદણ્ડં ભો ચેતઃ શ્રીરામં ભજ શરણમ્ ॥ ૫॥

જમદગ્નિઃ –
પરાપવાદં પરિહર જિહ્વે પારુષ્યં ચાનૃતમપિ મા વદ સઙ્કીર્તય કેશવ નારાયણ દામોદર કૃષ્ણ નરહરે વૈકુણ્ઠાધિપ લક્ષ્મીવલ્લભ બુધજનમાનસમન્દિર સીતાનાયક દશરથનન્દન ઇતિ સતતં ભો ચેતઃ શ્રીરામં ભજ શરણમ્ ॥

શ્રિતચિન્તામણિમતિકરુણાકરમરિહરમુરુતરશરકોદણ્ડં ભો ચેતઃ શ્રીરામં ભજ શરણમ્ ॥ ૬॥

વસિષ્ઠઃ –
નિત્યાનન્દં સત્યમનન્તં બ્રહ્મ પરાત્પરમવ્યયમમલં નિત્યં શુદ્ધં બુદ્ધં શાશ્વતમપ્રમેયમનાદ્યન્તં સર્વાસામુપનિષદામર્થોઽયં શ્રીરામઃ સીતાપતિરિતિ ચતુરાનનશિવહૈમવતીજપસર્વસ્વં મન્ત્રં ભો ચેતઃ શ્રીરામં ભજ શરણં ભજ રઘુરામં શરણમ્ ॥

શ્રિતચિન્તામણિમતિકરુણાકરમરિહરમુરુતરશરકોદણ્ડં ભો ચેતઃ શ્રીરામં ભજ શરણમ્ ॥ ૭॥

એવં સ્તુત્વા રામચન્દ્રં મુનીન્દ્રાઃ
પ્રત્યેકં તે ભક્તિનમ્રાસ્તદાનીમ્ ।
આપન્નાર્તિધ્વાન્તભાનું પ્રપન્ના-
સ્તૂષ્ણીમાસન્ રામપાદૈકનિષ્ઠાઃ ॥ ૮॥

ઇતિ શ્રીરામસપ્તર્ષિસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Rama Saptarshi Stotram*
pdf was typeset on September 13, 2020

Please send corrections to *sanskrit@cheerful.com*